शोध-शीर्षक:

श्रीमद्भगवद्गीताया: शङ्कर-रामानुज-मध्वारीत्या तुलनात्मकमध्ययनम्

(A comparative study of the shrimadbhagavadgitaa with special reference to Sankara, Raamaanuja and Madhwaa)

रॉचीविश्वविद्यालये संस्कृतविभागे विद्यावारिधि **(Ph.D)** इत्युपाधिप्राप्तये

प्रस्तावित: शोधविषय:

शोधनिर्देशिका-

डॅ॰ दीपिका टोप्पो

असिस्टेंट प्रोफेसर, संस्कृतविभाग:,

डोरंडा महाविद्यालय:, रॉची।

गवेषिका- पलि-मण्डल

प्रास्ताविकम्

प्रकृतशोधस्य उद्देश्यम् -

श्रीमद्भगवद्गीतायाः शङ्कर-रामानुज-मध्वारीत्या तुलनात्मकमध्ययनम् इति श्रीर्षकाङ्कितो अस्माभिः शोधप्रबन्धः विद्यावारिधि (Ph.D) इत्युपधिप्राप्तये गृहीतः। भारतीयसंस्कृतौ धारिका वाहिका च श्रीमद्भगवद्गीता। ग्रन्थस्यास्य माहात्म्यम् अलौकिकम्। उपनिषद्दर्शनादिग्रन्थानां सारः भगवद्गीता। अस्याः ज्ञाने सति सर्वेषां ग्रन्थानां ज्ञानं सञ्जायते। सुप्रसिद्धायाः अस्याः भगवद्गीतायाः वहुनि व्याख्यानानि वर्तन्ते। तासु व्याख्यासु भारतवर्षस्य सनातनसंस्कृतौ शङ्कर-रामानुज-मध्वोक्तव्याख्यानामत्यन्तसुप्रसिद्धत्वात् गूढार्थप्रतिपादने सूक्ष्मत्वात् भगवद्गीतायां कर्मभक्तिज्ञानयोगप्राधान्येन विभक्तेषु षड्कत्रयेषु प्रथमषड्कमाधारीकृत्य तत्र तेषामाचार्याणां मतसादृश्यवैसादृश्ये वैसादृश्यहेतवः प्राप्ते मतविरोधे ग्रहणयोग्यमतस्य ग्रहणायोग्यमतस्य च प्रतिपादनम् ग्रहणयोग्यत्वायोग्यत्वे च युक्तयः सूक्ष्मातिसूक्ष्मतया आलोचनं शोधप्रबन्धास्य उद्देश्यम्। पुनश्च भगवद्गीतायां: केवलाद्वैतविशिष्टाद्वैतद्वैतपरकं व्याख्यात्रयमधिकृत्य तुलनात्मकमध्ययनं शोधार्थिभिश्च एतावता प्रायः न सधितमिति विभाव्यते। अतोऽयं विषयः शोधप्रबन्धास्य विषयत्वेन अस्माभिः गृहीता।

प्रकृतशोधस्य फलम् -

'प्रयोजनं विना मन्दोऽपि न प्रवर्तते ' इति नयेन मनुष्यस्य प्रवृत्तिः प्रयोजनेन विना कस्मिंश्चिदपि कर्मणि न दृश्यन्ते। तथा च शोधप्रबन्धस्यापि किञ्चित् प्रयोजनमस्ति। शङ्कररामानुजमध्वाचार्याणां मतविरोधो वर्तते, तत्र कस्य मतं ग्रहणयोग्यमयोग्यं चेति विचिन्त्य ये मतिभ्रान्ताः तेषां कृते नवीनतया दिग्दर्शनं भवेत् इति शोधप्रबंधस्यास्य प्रथमं फलम्। शोधप्रबन्धेऽस्मिन् केवलाद्वैतविशिष्टाद्वैतद्वैतदर्शनोक्तसिद्धान्तानां विशद्विवरणं विद्यते येन तेभ्यः उक्ताः नयाः सुलभतया ज्ञातुं शक्यन्ते इति शोधप्रबन्धस्यास्य द्वितीयं फलम्। अद्यत्वे विश्वविद्यालयेषु महाविद्यालयेषु च भगवद्गीता पाठ्यविषयत्वेन संस्थाप्यते इत्यतः छात्रा अपि अनेन गवेषणकर्मणा उपकृताः भवेयुः इति आशास्महे।

शोधपद्धतिः -

श्रीमद्भगवद्गीतायाः शङ्कर-रामानुज-मध्वारीत्या तुलनात्मकमध्ययनम् कर्तुं समीक्षात्मकपद्धतेः उपयोगः क्रियते। अध्ययनान्तरम् आवश्यकतानुसारं विश्लेषणपद्धतेः विवेचनपद्धतेः तुलनात्मकपद्धतेश्च उपयोगः क्रियते।

भूमिका-

विद्यते खलु भुवि प्रपञ्चसत्यत्वबुद्धिनाशिनी देहादिविलक्षणप्रत्यगात्मस्वरूपयथार्थाववोधरूपिनी अखिलानर्थरूपसंसारहेतभूताविद्याग्रन्थिभेदिनी उपनिषदिति। अनया हि ज्ञायते 'अहं व्रह्मास्मि ' 'तत्वमसि' 'अयमात्मा व्रह्म ' 'सर्वं खलु इदं व्रह्म' प्रज्ञानं व्रह्म ' चेति जीवव्रह्मैकम्। जीवब्रह्मणोरैक्यरुपोपनिषदर्थप्रतिपादनत्त्वात् श्रीमद्भगवद्गीतायाः उपनिषत्त्वव्यवहारः।श्रूयते हि 'श्रीमद्भगवद्गीतासु उपनिषत्सु '।

श्रीमद्भागवतगीता भगवतः श्रीकृष्णस्य मुखनिःसृता वाणी । अतः माहात्म्यमलौकिकम्। महाभारतस्य अष्टादशपर्वेषु भीष्मपर्वणः पञ्चविंशत्यध्यायतः द्विचत्वारिंशदाध्यायपर्यन्तम् अष्टादशाध्यात्मिका श्रीमद्भागवतगीता। यद्यपि वेदव्यासेन महाभारतमिति महाकाव्यं प्रणीतः तथापि श्रीमद्भगवद्गीतापि महर्षिणा वेदव्यासेनोक्ता। गीतायाः रचनाकालविषये विप्रतिपत्तौ सत्यामपि ख्रिष्टपूर्वात् पञ्चमशतकात्चतुर्थशतकस्य मध्यवर्त्तिनि काले प्रणीता इति विशेषज्ञस्य काशीनाथोपाध्यायस्याभिमतम्।

यद्यपि प्रस्थानत्रयेषु स्मृतिप्रस्थाने गीतायारन्तर्भावः तथापि गीतायामुपनिषद्गतविषयानां प्रतिपादनात् गीता गीतोपनिषदित्युच्यते। महर्षिणा व्यासदेवेनोक्तम् यत्-

" गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः

या स्वयं पद्मनाभस्य मुखपद्माद् विनिःसृता।

श्रीमद्भागवतगीतायाः वहुनि व्याख्यानानि सन्ति। यथा - भगवच्छङ्कराचार्यकृतकेवलाद्वैतमतं श्रीमद्रामानुजाचार्यकृतविशिष्टाद्वैतमतं श्रीमन्मध्वाचार्यकृतद्वैतमतं श्रीमद्वलदेवविद्याभूषणकृताचिन्त्यभेदाभेदमतं श्रीमद्वल्लभाचार्यकृतशुद्धाद्वैतमतं चेत्यादिनी भाष्यानि सन्ति। केचन भिन्नरूपेण प्रतिमानयोः जीवब्ह्मणोरैक्यमसिद्धमिति। अन्ये च सर्वस्य ब्रह्माभेदत्वात् अविद्यया च कल्पितभेदत्वात् जीवब्ह्मणोरैक्यमेव सिद्धमिति। 'भोक्ता भोग्यं प्रेरितारं' च मत्वा सर्वं प्रोक्तं 'त्रिविधं ब्रह्म मे मतम् ' इति श्रत्यखनुसारेण जीवस्य ब्रह्मणः जगतश्च सत्यत्वात् तेषामैक्यमप्रसिद्धम् इति अपरे मन्यते। एवं वहुषु मतेषु भारतवर्षस्य सनातनसंस्कृतौ भगवच्छङ्कररामानुजमध्वोक्तमतानामत्यन्तसुप्रसिद्धत्वात्अद्वैतविशिष्टाद्वैतद्वैतदर्शनपुरःसरं श्रीमद्भगवद्गीतोक्त कर्मभक्तिज्ञानयोगप्राधान्येन विभक्तेषु षडङ्कत्रयेषु प्रथमषडङ्कमाधारीकृत्य तत्र तेषामाचार्याणां मतसादृश्यवैसादृश्ये, वैसादृश्यहेतवः, प्राप्ते मतविरोधे कस्य मतं ग्रहणयोग्यमयोग्यं च, ग्हणयोगत्वेऽयोग्यत्वेच युक्तयः सूक्ष्मातिसूक्ष्मतया शोधप्रबन्धेऽस्मिन् आलोच्यन्ते। अत्रेदमवधेयं यत्

प्रथमषड्केऽन्तरभूतेऽर्जुनविषादाख्यप्रथमेऽध्याये रामानुजभाष्याभावात् समीक्षणस्यानवश्यकत्वादध्यायोऽयमत्र नालोचितः।

शोधप्रबन्धास्य केवलाद्वैतमते ब्रह्मणः एव सत्यत्वं ब्रह्मभिन्नस्य च सर्वस्य मिथ्यात्वम्। प्रपञ्चस्य मिथ्यात्वे परमात्मनश्च सत्यत्वे युक्तयः, ब्रह्मणः जगज्जन्मादिकारणत्वम्, ब्ह्मप्राप्तौ ज्ञानस्य साक्षात्साधनत्वं कर्मणश्च परम्परया साधनत्वम्, सद्योक्रमभुक्तिभेदेन मुक्तेः द्वैविध्यत्वम्, पारमार्थिकदिशा सद्भूतस्य निर्गुणब्रह्मणः उपासनाववोधाय कल्पितत्वं सगुणत्वंम्, अविद्यावतो वोधार्थं मुक्यतस्यापि अवशिष्टं से प्रारव्धं कर्म, ब्रह्मज्ञानेनैव अविद्याकार्यस्य समूलस्य नाशः मुक्तवाप्त्यर्थञ्च श्रवणमनननिदिध्यासनादीनाम् अन्तरङ्गसाधनत्वं प्रतिपादितम्। अपि च विशिष्टाद्वैतिभिः समाश्रितस्य चिदाचिद्विशिष्टब्रह्मणः सगुणत्वंम्, जगतोऽचिद्रूपत्वम्, जीवेश्वतप्रकृतिनां सत्यत्वं स्वरूपञ्च, जीवेशयोरंशांशिभावत्वम्। सालोक्यसार्ष्टिसामीप्यसारुप्यसायुज्यभेदेन मुक्तिपञ्चकम्, मुक्तवाप्तौ कर्मणःसाक्षात्साधननत्वं ज्ञानस्य च कर्मान्तर्गतत्वम् आलोचितम्। एवञ्च ब्रह्मणः जगज्जीवयोः सत्यत्वम्, तेषां सत्यत्वे युक्तयः, परस्परं च भिन्नत्वात् द्वैतवादः, जीवब्रह्मणयोरंशंशिसम्बन्धः। परमात्मविषयकापरोक्षज्ञानेनैव प्रमादात्मकबन्धस्य निवृत्तित्वं प्रतिपादितम्। निष्कामकर्मत्वं श्रवणमनननिदिध्यासनत्वं भक्तित्वं वैराग्यत्वञ्च मोक्षस्य साधनरूपत्वम्। मुक्त्यवाप्तौ चतुर्गुणयुक्तोपसना ज्ञानकर्मसमुच्चयः च साधनम्। प्रारब्धक्षये सति आत्मा लिङ्गशरीरमधिकृत्य ब्रह्मरन्ध्रद्वारेण स्थूलदेहात् उत्क्रम्य देवयानमार्गेण ब्रह्मलोकमधिगम्य परब्रह्म प्राप्नोति। अनन्तरं श्रीविष्णोरनुग्रहेण मुक्तिः लभ्यते। सद्वस्तुणो विषये भगवच्छङ्कररामानुजमध्वाचार्याणां मतविरोधे सति तत्र श्रुत्यनुसारित्वात् शङ्करमतस्यैव ग्रहणयोग्यत्वं रामानुजमध्वमतयोश्च ग्रहणायोग्यत्वं ग्रहणयोग्यत्वायोग्यत्वयोश्च युक्तयः प्रदर्शिताः। एवमपि मुक्तिस्तत्साधनविषयेषु तेषां विप्रतिपत्तौ सत्यां तत्र तेषां मतानां ग्रहणयोग्यत्वायोग्यत्वे च युक्तयः निगदिताः। श्रीमद्भगवद्गीतायाः शङ्कर-रामानुज-मध्वारीत्या तुलनात्मकमध्ययनम् शीर्षकाङ्कितो शोधप्रबन्धः पञ्चाध्यायैः विभक्तो वर्तते

प्रथमेऽध्याये अर्जुनस्य किंकर्तव्यविमूढ़त्वं , युद्धे अनीहात्वं, श्रीकृष्णस्य इन्द्रियसंयमस्योपदेशत्वम्, आत्मनः नित्यत्वं तद्भिन्नस्य अन्यस्य चानित्यत्वम्, आत्मनः शाश्वत्वम्,अव्ययत्वं, विकाररहितत्वं, सर्वव्याप्यत्वम्, अक्लेद्यत्वम्, अच्छेद्यत्वं वर्णितम्। स्थितप्रज्ञस्य लक्षणं, शोकं परिहृत्य क्षत्रियधर्मरूपे अर्जुनस्य युद्धं कर्तव्यम्।

द्वितीयेऽध्याये कर्तव्यकर्मणः स्वरूपं कर्तव्यते च जगच्चक्रप्रवृत्तिविचारहेतौ। ब्रह्मविदः कर्मानुयोगः, परब्रह्मणः श्रेष्ठत्वम्, निष्कामकर्मणा संसिद्धिलाभः , कर्मणः करणीयाकरणीययोः कारणानि, ज्ञानिनां कर्मकरणे हेतुरज्ञस्यैव च कर्मासक्तिः , कर्माचरणकाले अशेषमलत्यागः महावैरिणश्च कामस्य त्यक्तव्यमालोचितम्।

तृतीयेऽध्याये भगवत्सम्भवे हेतवः, भगवज्जन्मकर्मस्वरूपज्ञानान्मुक्तिः मुक्तपुरुषस्य स्तुतिः , ब्रह्मणोऽशेषाभेदप्रतिपादनम्, ज्ञानयज्ञस्य महिमा, ज्ञानेन मोहनाशविचारः, मुक्तस्य अशेषकर्मप्रहाणिः, संशयस्य महापापकथनं तच्छिन्नस्यैव च मुक्तिः निगदिता।

चतुर्थेऽध्याये अर्जुनकृतविशयस्वरूपम्, कर्मयोगस्य महिमा, कर्मसन्न्यासकर्मयोगयोः समफलप्रदर्शनम्, विविदिषासन्न्यासानुष्ठाने कर्मयोगिसिद्धस्य कर्मालेपः , परब्रह्मणः पुण्यपापास्पर्शः तज्ज्ञानेन चाज्ञाननाशविचारः, ब्रह्मज्ञानेनैव शान्त्यवाप्तिः , ब्रह्मणि स्थितस्यैव जितसर्गत्वम्, आत्मविदोऽवस्थितिस्वरूपं मोक्षवाप्तौ च अधिकारिप्रदर्शनं विहितम्।

पञ्चमेऽध्याये सांख्ययोगयोरभेदः योगारूढस्य देशकालौ अशेषकामनात्यागः, सम्यग्दर्शनफलम्, योगभ्रष्टस्य गतिविषयकः संशयः , योगसंस्कारस्य जन्मानुवर्तने कारणम्, योगिनामासनकर्मप्रदर्शनम् ध्यानयोगफलम्, परमात्मलाभस्य योगसंज्ञा, योगिनोऽवस्थाविमर्शः चञ्चलमनसश्च निग्रहोपायः प्रदर्शितः।

षष्ठेऽध्याये सम्पूर्णप्रबन्धसाथसंग्रहः विहितः।

एवमस्माभिः शोधप्रबन्धैऽस्मिन् श्रीमद्भगवद्गीतागतप्रथमषड्कस्थानां भगवच्छङ्कररामानुजमध्वाचार्याणां प्रणीतानां भाष्याणां व्याख्यानपुरःसरं तत्तद्भाष्योक्तवैमत्यानि मतैक्यानि इतरेतरकृता आक्षेपाः तत्समाधानञ्च प्रतिपादितम्

श्रीमद्भगवद्गीतायाः शङ्कर- रामानुज- मध्वारीत्या तुलनात्मकमध्ययनम्।

भूमिका

श्रीमद्भगवद्गीतायाः सामान्यपरिचयः
उपोद्घातगतशाङ्करभाष्याभिप्रायः
उपोद्घातगतरामानुजभाष्याभिप्रायः
उपोद्घातगतमाध्वभाष्याभिप्रायः

१. प्रथमोऽध्यायः –सांख्ययोगाध्यायपर्यालोचनम्

शङ्कररामानुजमध्वाचार्याणां वैमत्यस्थलानि

१.१. आत्मन: नित्यत्वविचार:

१.२. सदसदत्स्वरूपम्

१.३. निष्कामकर्मण: उत्कृष्टत्वम्

१.४. कर्मण्येवाधिकारप्रदर्शनम्

१.५. योगबुद्धिविमर्ष:

१.६. स्थितप्रज्ञलक्षणम्

शङ्कररामानुजमध्वाचार्याणां मतैक्यस्थलानि

१.७. अर्जुनेन कृतशोकस्य अनैचित्यप्रदर्शनम्

१.८. कर्मबन्धत्यागोपाय:

१.९. कर्मयोगमनुतिष्ठत: परमात्मतत्त्वावाप्तिकाल:

१.१०.स्थितप्रज्ञस्यैव निर्वाणवाप्तिस्तत्कालनिर्णयश्च

२.द्वितीयोऽध्याय: -कर्मयोगाध्यायपयार्लोचनम

शङ्कररामानुजमध्वाचार्याणां वैमत्यस्थलानि

२.१. अजुर्नकृतसंशयस्वरूपम्

२.२. करणीयकमर्णस्स्वरूपं करणे च हेतवः

२.३. कमर्णः कर्तव्यत्वे जगच्चक्रप्रवृत्तिविचार:

२.४.आत्मविदः कर्मानुपयोग:

२.५. परमात्मनः श्रेष्ठत्वप्रतिपादनम्

शङ्कररामानुजमध्वाचार्याणां मतैक्यस्थलानि

२.६. कर्मण: करणीयत्वाकरणीयत्वयो: कारणानि

२.७. निष्कामकर्मणा संसिद्धिकथनम्

२.८. ज्ञानिनां कर्मकरणे हेतुरज्ञस्यैव च कर्मासक्ति:

२.९. महावैरिण: कामस्य त्यागकथनम्

३.तृतीयोऽध्याय: - ज्ञानकर्मसन्न्यासयोगाध्यायपर्यालोचनम्

शङ्कररामानुजमध्वाचार्याणां वैमत्यस्थलानि

३.१. भगवत्सम्भवे कारणानि

३.२. भगवज्जन्मकर्मस्वरूपज्ञानान्मुक्तिः
३.३. मुक्तपुरुषस्य स्तुतिः
३.४ ब्रह्मणोऽशेषाभेदप्रतिपादनम्
३.५. ज्ञानयज्ञस्य माहात्म्यम्
३.६. ज्ञानेन मोहनाशविचारः

शङ्कररामानुजमध्वाचार्याणां मतैक्यस्थलानि

३.७. भगवज्जन्मकर्मतत्त्वज्ञानेन मोक्षलाभः
३.८. मुक्तस्याशेषकर्मप्रहाणिः
३.९. ज्ञानमाहात्म्यविमर्शः
३.१०.संशयस्य महापापकथनं छिन्नसंशयस्य च मुक्तिप्रदर्शनम्

४.चतुर्थोऽध्यायः - कर्मसन्न्यासयोगाध्यायः

शङ्कररामानुजमध्वाचार्याणां वैमत्यस्थलानि

४.१. अर्जुनकृतविशय स्वरूपम्
४.२. कर्मयोगस्य श्रेष्ठत्वप्रतिपादनम्
४.३. कर्मसन्न्यासकर्मयोगयोः समानफलप्रदर्शनम्
४.४. ब्रह्मविदः कर्मालेपः
४.५. निष्कामबुद्धेः माहात्म्यम्
४.६. ब्रह्मज्ञानेनैव शान्त्यवाप्तिः

शङ्कररामानुजमध्वाचार्याणां मतैक्यस्थलानि

४.७. ब्रह्मणि स्थितस्यैव जितसर्गत्वम्
४.८. ब्रह्मविदोऽवस्थितिस्वरुपम्
४.९. मोक्षवाप्तौ अधिकारिप्रदर्शनम्
४.१०.अवाप्तब्रह्मणः स्वरूपम्

५. पञ्चमोऽध्यायः - ध्यानयोगाध्यायपर्यालोचनम्

शङ्कररामानुजमध्वाचार्याणां वैमत्यस्थलानि

५.१. सन्न्यासयोगयोःऽभेदप्रतिपादनम्
५.२. अशेषकामनात्यागविमर्शः
५.३. समदर्शिनोऽविनाश्यत्वविचारः
५.४. सम्यग्दर्शनफलम्

५.५. योगसंस्कारस्य जन्मानुवर्तने कारणम्
शङ्कररामानुजमध्वाचार्याणां मतैक्यस्थलानि
५.६. मुक्तपुरुषस्य लक्षणम्
५.७. ध्यानयोगफलविमर्शः
५.८. योगिनोऽवस्थाविमर्शः
५.९. चञ्चलमनसः निग्रहोपायः
५.१०.असंयतचित्तस्य योगानवाप्तिः

उपसंहारः

अबलोकितग्रन्थसूची

१. ईशोपनिषत्, दिल्ली - मोतिलाल, वनारसीदाश, २००२।

२. बृहदारण्यकोपनिषत्, शाङ्करभाष्यसमेता, गोरखपुर - गीताप्रेस (प्रकाशक एवं मुद्रक), सं. २०७०।

३. जीवन्मुक्तिविवेकः, विद्यारण्यस्वामी, महाप्रभुलाल गोस्वामी (सम्पादकः), वाराणसी -चौखम्वासंस्कृतप्रतिष्ठान, २००८।

४. पातञ्जलयोगदर्शनं व्यासभाष्यसम्वलितं तच्च योगसिद्धि -हिन्दी व्याख्योपेतम्, महर्षि पतञ्जलि, व्याख्याकारः- सुरेशचन्द्रश्रीवास्तव , वाराणसी - चौखम्वा, सुभारती, प्रकाशन, २००८।

५. महाभारतम्, वेदव्यासः, गीताप्रेस- गोरखपुर , २००८।

६. वेदान्तपरिभाषा , धर्णराजाध्वरीन्द्र,श्रीसीतारामशास्त्री- मुसलगाकरः (सम्पादकः), वाराणसी - चौखम्वा विद्याभवन, २०१०।

७. श्रीमद्भगवच्छङ्कराचार्यविरचितं श्रीमद्भगवद्गीताभाष्यम्, श्रीमदनुभूतिस्वरूपाचार्यविरचितः श्रीमदनन्दगिरिस्वमीविरचितः श्रीबेल्लकोण्ड-रामरायकविविरचितश्च, प्रथमः द्वितीयश्च खण्डः, मीमांसावेदान्ताचार्य-श्रीमणिद्राविडः (संशोधकः) , वाराणसी- श्रीदक्षिणामूर्तिमठप्रकाशनम्, २०१५।

८.श्रीमद्गीताभाष्यम् ,श्रीमज्जयतीर्थविरचितप्रमेयदीपिकाटीकया, श्रीराघवेन्द्रतीर्थविरचितभावदीपव्याख्यया च सहितम्, विद्वान् सि. आर. चतुर्वेदी प्रदीपसिंहाचार्यः (सम्पादकः), कृष्ण अ. हारनहल्लिः (हिन्दी-अनुवादकः), पूर्णप्रज्ञसंशोधनमन्दिरम्, पूर्णप्रज्ञविद्यापीठम्, वेङ्गलुरू,२०१४।

९. श्रीमदानन्दतीर्थभगवत्पदाचार्यविरचितं ब्रह्मसूत्रभाष्यम्टीकाटिप्पणीभिः समलङ्कृतम् (प्रथमोऽध्यायः), पॅ.जयतीर्थाचार्य (सम्पादकः), विश्वमध्वमहापरिषत्, उत्तरादिमठः, बेंगलुरू।

१०.श्रीमदानन्दतीर्थभगवत्पदाचार्यविरचितं ब्रह्मसूत्रभाष्यम् श्रीजगन्नाथपतिविरचितभाष्यदीपिका सुत्रदीपिकासहितम् (द्वितीयोऽध्यायः), रंगनाथकट्टि (सम्पादकः) पूर्णप्रज्ञसंशोधनमन्दिरम्, पूर्णप्रज्ञविद्यापीठम् बेंगलुरू।

९१. विवेकचूड़ामणिः, भगवान शङ्करः, स्वामी लोकेश्वरानन्द (अनुवादक एवं व्याख्याकार;) कोलकाता - प्रणति पाब्लिसार्स हाउस, २००८(द्वितीय - संस्करण)।

१२. वेदान्तदर्शनम् सूत्रार्थ - वैयासिकन्यायमाला- शाङ्करभाष्य- भावदीपिका-वङ्गव्याख्यासहितम्, स्वामी विश्वरुपानन्द (अनुवादक एवं व्याख्याकारः) कोलकाता -उद्बोधन-कार्यालयः २०१४।

१३. वेदान्तसारः, सदानन्दयोगिन्द्रसरस्वती, विपद्भञ्जनपाल(सम्पादकः) कोलकाता -पुस्तकभाण्डार, २०१०
(नवसंस्करण)।
१४. श्रीमद्भगवद्गीता, स्वामी वासुदेवानंद (अनुवादक एवं व्याख्याकारः) कलिकाता-उद्बोधनकार्यालय, २०१४।